
# विचित्रा सृष्टिः

## (वर्तमानकालः - लट्प्रयोगः)




एकस्मिन् अरण्ये महान् वटवृक्षः **अस्ति** । तस्य कोटरे एकः खञ्जनपरिवारः सानन्दं **निवसति** । कदाचित् खञ्जनपरिवारे एकः नूतनः शावकः जन्म **नयति** । खञ्जनमाता तस्मै प्रतिदिनं भोजनं **ददाति** । एकदा सा स्वस्य कृष्णवर्णं दृष्ट्वा चिन्तितवती - अहो ! ईश्वरस्य पक्षपातः कीदृशः ? केचन सुन्दराः **भवन्ति** । अन्ये केचन कृष्णवर्णाः असुन्दराः च भवन्ति । कोकिलस्य स्वर इव मम स्वरः **नास्ति** । शुकः इव मम सुन्दरं रूपं न भवति । यदि ईश्वरस्य कृपा भवति, तर्हि मम परिवारस्य सर्वे सुवर्णवर्णाः भवेयुः । वयं गर्वं कर्तुं **पारयामः** ।

प्रतिदिनम् एवं हीनभावनया पीडिता **भवति** खञ्जनमाता । अस्मिन् समये एकः सुन्दरः शुकः तत्र आगच्छति । यदा वृक्षशाखायां खञ्जनमाता तं पश्यति, तदा तस्याः मनसि ईर्ष्या **आगच्छति** । सा **चिन्तयति**, शुकस्य यत् सौन्दर्यं तत् मयि नास्ति । तस्य गानम्, उड्डयनं कर्णद्वयस्य नेत्रद्वयस्य च तृप्तिं **जनयति** । तदा एकः व्याधः तत्र **आगच्छति** । जालेन शुकस्य बन्धनं **करोति**, पिञ्जरामध्ये तं **स्थापयति** च । भीता खञ्जनमाता शुकस्य अवस्थां **पश्यति** । ईश्वरस्य कृते धन्यवादम् **अर्पयति** । **वदति** च - शुकसदृशं सौन्दर्यं यदि मयि **भवति**, तर्हि अहं तत्क्षणं बन्धनयुक्ता भवेयम् । ईश्वरस्य सृष्टिः व्यवस्थिता अस्ति । अस्माकं मनः तु अव्यवस्थितम् एव ।

अनेन सत्यज्ञानेन खञ्जनमातुः हीनभावना **गच्छति** । सा परिवारेण सह सुखेन कालं **यापयति** ।

| **खञ्जनपरिवारः, केचन, ईर्ष्या, उड्डयनम्, अर्पयति ।** |
| --- |

## टिप्पणी

**शब्दार्थः -**

खञ्जनपरिवारः - खञ्जरीटःपक्षिपरिवारः (କଜଳପାତି ପରିବାର), पक्षपातः - एकपक्षविचारः (ଏକ ପାଖିଆ ବିଚାର), पारयामः - समर्थाः भवामः (ସମର୍ଥ ହେବ), ईर्ष्या - असहिष्णुता (ଅସହିଷ୍ଣୁତା), भीता - भयं प्राप्ता (ଭୟ ପାଇ), अर्पयति-समर्पणं करोति (ଦେଉଛି), व्यवस्थिता - व्यवस्थायुक्ता (ଠିକ୍‌ଠାକ୍) ।

# अभ्यास :

- **पश्यत, उच्चैः पठत -**

**वर्तमानकालः - लट्-लकारः**

**प्रथमपुरुषः**

| | **एकवचनम्** | | **द्विवचनम्** | | **बहुवचनम्** |
|---|---|---|---|---|---|
| | (गम्) - गच्छति | | गच्छतः | | गच्छन्ति |
| | (पठ्) - पठति | | पठतः | | पठन्ति |
| | (हस्) - हसति | | हसतः | | हसन्ति |
| **बालकः** | (भू) - भवति | **बालकौ** | भवतः | **बालकाः** | भवन्ति |
| **बालिका** | (कृ) - करोति | **बालिके** | कुरुतः | **बालिकाः** | कुर्वन्ति |
| **मित्रम्** | (दृश्) - पश्यति | **मित्रे** | पश्यतः | **मित्राणि** | पश्यन्ति |
| | (नी) - नयति | | नयतः | | नयन्ति |
| | (अस्) - अस्ति | | स्तः | | सन्ति |
| | (स्था) - तिष्ठति | | तिष्ठतः | | तिष्ठन्ति |
| | (दा) - ददाति | | दत्तः | | ददति |
| | (ज्ञा) - जानाति | | जानीतः | | जानन्ति |

**मध्यमपुरुषः**

| | | | | | |
|---|---|---|---|---|---|
| | (गम्) - गच्छसि | | गच्छथः | | गच्छथ |
| | (पठ्) - पठसि | | पठथः | | पठथ |
| | (हस्) - हससि | | हसथः | | हसथ |
| | (भू) - भवसि | | भवथः | | भवथ |
| **त्वम्** | (कृ) - करोषि | **युवाम्** | कुरुथः | **यूयम्** | कुरुथ |
| | (दृश्) - पश्यसि | | पश्यथः | | पश्यथ |
| | (नी) - नयसि | | नयथः | | नयथ |
| | (अस्) - असि | | स्थः | | स्थ |

| | | | | | |
|---|---|---|---|---|---|
| | (स्था) - तिष्ठसि | | तिष्ठथ: | | तिष्ठथ |
| | (दा) - ददासि | | दत्थ: | | दत्थ |
| | (ज्ञा) - जानासि | | जानीथ: | | जानीथ |

**उत्तमपुरुष:**

| | | | | | |
|---|---|---|---|---|---|
| | (गम्) - गच्छामि | | गच्छाव: | | गच्छाम: |
| | (पठ्) - पठामि | | पठाव: | | पठाम: |
| | (हस्) - हसामि | | हसाव: | | हसाम: |
| | (भू) - भवामि | | भवाव: | | भवाम: |
| **अहम्** | (कृ) - करोमि | **आवाम्** | कुर्व: | **वयम्** | कुर्म: |
| | (दृश्) - पश्यामि | | पश्याव: | | पश्याम: |
| | (नी) - नयामि | | नयाव: | | नयाम: |
| | (अस्) - अस्मि | | स्व: | | स्म: |
| | (स्था) - तिष्ठामि | | तिष्ठाव: | | तिष्ठाम: |
| | (दा) - ददामि | | दद्व: | | दद्म: |
| | (ज्ञा) - जानामि | | जानीव: | | जानीम: |

**१. उदाहरणानुसारं शून्यस्थानं पूरयत -**

| | | |
|---|---|---|
| उदा - मृग: धावति । | मृगौ धावत: । | मृगा: धावन्ति । |
| (क) बालिका रचयति । | ...................... | ...................... |
| (ख) यानं याति । | ...................... | ...................... |
| (ग) माता पालयति । | ...................... | ...................... |
| (घ) कोकिल: कूजति । | ...................... | ...................... |
| (ङ) पुष्पं विकसति । | ...................... | ...................... |
| (च) पिता नयति । | ...................... | ...................... |
| (छ) कृषक: कर्षति । | ...................... | ...................... |
| (ज) तक्षक: तक्षति । | ...................... | ...................... |

(झ) भगिनी स्निह्यति । ...................... ......................

(ञ) बालिका जल्पति । ...................... ......................

(ट) वानरः आरोहति । ...................... ......................

(ठ) मशकः दशति । ...................... ......................

(ड) सिंहः गर्जति । ...................... ......................

(ढ) मूर्खः निन्दति । ...................... ......................

(ण) बालः स्मरति । ...................... ......................

२. **उचितपदेन शून्यस्थानं पूरयत ।**

(क) ग्राहकः वस्तु .................. । (क्रीणाति, क्रीणीतः, क्रीणन्ति)

(ख) आरक्षकौ चोरं .................. । (गृह्णाति, गृह्णीतः, गृह्णन्ति)

(ग) भक्ताः पुष्पं .................. । (चिनोति, चिनुतः, चिन्वन्ति)

(घ) भवन्तौ उच्चैः .................. । (रोदिति, रुदतः, रुदन्ति)

(ङ) अहं वस्त्रं .................. । (नयामि, नयावः, नयामः)

(च) त्वं भीत्या .................. । (ददासि, दत्थः, दत्थ)

(छ) वयं सेवां .................. । (करोति, कुर्वः, कुर्मः)

(ज) यूयं जीविकां .................. । (प्राप्नोसि, प्राप्नुमः, प्राप्नुथ)

(झ) आवां दुग्धं .................. । (पिबामि, पिबावः, पिबामः)

(ञ) युवां शास्त्रं .................. । (शृणोषि, शृणुथः, शृणुथ)

३. **उदाहरणानुसारं शून्यस्थानं पूरयत -**

यथा - छात्रः पाठं पठति । छात्रौ पाठं पठतः । छात्राः पाठं पठन्ति ।

(क) अलसः निद्रां करोति । ...................... ......................

(ख) ...................... । शिशू प्रान्तरे क्रीडतः । ......................

(ग) ...................... । ...................... । भ्रातरः भ्रमणं कुर्वन्ति ।

(घ) अहं विद्यालये तिष्ठामि । ...................... । ...................... ।

(ङ) ...................... । दरिद्रौ दु:खेन रुदत: । ...................... ।

(च) कार्यकर्ता कार्यं जानाति । ...................... । ...................... ।

(छ) ...................... । ...................... । वृक्षा: फलं ददति ।

(ज) ...................... । आवां गृहं गच्छाव: । ...................... ।

(झ) त्वम् उपदेशं शृणोषि । ...................... । ...................... ।

४. **अत्र २० क्रियापदानि सन्ति । तेषाम् अन्वेषणं कुरुत ।**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| आ | न | य | ति | व | ✦ | वा | प्र |
| क | रो | ति | व | द | दा | ति | क्षा |
| र्ष | ✦ | ह | स | ति | ✦ | ✦ | ल |
| ति | च | ल | ति | ष्ठ | अ | ✦ | य |
| उ | प | वि | श | ति | व | ह | ति |
| त्ति | त | ✦ | क्नो | वि | त | र | ति |
| ष्ठ | ति | ✦ | ति | ✦ | र | क्ष | ति |
| ति | त्य | ज | ति | स्ना | ति | ✦ | ✦ |

यथा : - (क) आरोहति

(ख) ......................

(ग) ......................

(घ) ......................

(ङ) ......................

(च) ......................

(छ) ......................

(ज) ......................

(झ) ......................

(ञ) ......................

(ट) ......................

(ठ) ......................

(ड) ......................

(ढ) ......................

(ण) ......................

(त) ......................

(थ) ......................

(द) ......................

(ध) ......................

(न) ......................

५.	**एकपदेन उत्तरं कुरुत -**

(क)	वटकोटरे क: निवसति ?

(ख)	ईश्वरस्य कृपया खञ्जनपरिवारा: कीदृशा: भवेयु: ?

(ग)	खञ्जनमाता प्रतिदिनं कया पीडिता भवति ?

(घ)	खञ्जनमातु: मनसि किम् आगच्छति ?

(ङ)	शुकस्य किं कर्णद्वयस्य तृप्तिं जनयति ?

(च)	व्याध: केन शुकस्य बन्धनं करोति ?

(छ)	का व्यवस्थिता अस्ति ?

(ज)	अरण्ये क: अस्ति ?

(झ)	खञ्जनपरिवारे क: जन्म नयति ?

(ञ)	कीदृश: शुक: तत्र आगच्छति ?

(ट)	खञ्जनमाता शुकस्य किं मयि नास्ति इति चिन्तयति ?

(ठ)	भीता खञ्जनमाता शुकस्य कां पश्यति ?

(ड)	खञ्जनमाता ईश्वरस्य कृते किम् अर्पयति ?

(ढ)	अस्माकं मन: कीदृक् एव ?

(ण)	केन खञ्जनमातु: हीनभावना गच्छति ?

६.	**शून्यस्थानं पूरयत -**

(क)	खञ्जनपरिवार: .................... निवसति ।

(ख)	ईश्वरस्य .................... कीदृश: ?

(ग)	परिवारसदस्या: .................... भवेयु: ।

(घ)	तस्या: मनसि .................... आगच्छति ।

(ङ)	ईश्वरस्य सृष्टि: .................... अस्ति ।

(ईर्ष्या, व्यवस्थिता, पक्षपात:, सानन्दम्, सुवर्णवर्णा:)

**७.  मातृभाषया अर्थं लिखत -**

(क)  खञ्जनमाता तस्मै प्रतिदिनं भोजनं ददाति ।

(ख)  कोकिलस्य स्वर इव मम स्वरः नास्ति ।

(ग)  शुकस्य यत् सौन्दर्यं तत् मयि नास्ति ।

(घ)  अस्मिन् समये एकः सुन्दरः शुकः तत्र आगच्छत् ।

**८.  शुद्धं लिखत -**

(क)  केचन सुन्दराः भवति ।

(ख)  एकः नूतनः शावकः जन्म नयन्ति ।

(ग)  यदा वृक्षशाखायां खञ्जनमाता तं पश्यन्ति ।

(घ)  सा ईश्वरस्य कृते धन्यवादम् अर्पयन्ति ।

(ङ)  खञ्जनमातुः हीनभावना गच्छन्ति ।

**९.  स्तम्भद्वयं संयोजयत -**

| **'क'** | **'ख'** |
| --- | --- |
| सानन्दं | अस्ति |
| स्वरः | आगच्छति |
| वटवृक्षः | पश्यति |
| ईर्ष्या | भवन्ति |
| तृप्तिं | नास्ति |
| सुन्दराः | निवसति |
| अवस्थां | जनयति |

•